# Tarasara Upanishad

# તારસારોપનિષત્

## Document Information

Text title : Tarasara Upanishad

File name : tarasara.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 91 / 108; Shukla Yajurveda - vaishnava upanishad

Latest update : Apri 12, 2000 [Rama Navami], October 29, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# તારસારોપનિષત્

(શુક્લયજુર્વેદીયા)

યન્નારાયણતારાર્થસત્યજ્ઞાનસુખાકૃતિ ।
ત્રિપાન્નારાયણાકારં તદ્બ્રહ્મૈવાસ્મિ કેવલમ્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥

(અવિમુક્તોપાસનોપદેશઃ)

બૃહસ્પતિરુવાચ યાજ્ઞવલ્ક્યં યદનુ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનં તસ્માદ્યત્ર ક્વચન ગચ્છેત્તદેવ મન્યેતેતિ । ઇદં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । અત્ર હિ જન્તોઃ પ્રાણેષૂત્ક્રમમાણેષુ રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે યેનાસાવમૃતીભૂત્વા મોક્ષી ભવતિ । તસ્માદવિમુક્તમેવ  નિષેવેત । અવિમુક્તં ન વિમુઞ્ચેત્ । એવમેવૈષ ભગવન્નિતિ વૈ યાજ્ઞવલ્ક્યઃ ॥ ૧॥

(નારાયણસ્થૂલાષ્ટાક્ષરતારકમ્)

અથ હૈનં ભારદ્વાજઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં કિં તારકમ્ । કિં તારયતીતિ । સ હોવાચ યાજ્ઞવલ્ક્યઃ । ૐ નમો નારાયણાયેતિ તારકં ચિદાત્મકમિત્યુપાસિતવ્યમ્ । ઓમિત્યેકાક્ષરમાત્મસ્વરૂપમ્ । નમ ઇતિ દ્વ્યક્ષરં પ્રકૃતિસ્વરૂપમ્ । નારાયણાયેતિ પઞ્ચાક્ષરં પરંબ્રહ્મસ્વરૂપમ્ । ઇતિ ય એવં વેદ । સોઽમૃતો ભવતિ । ઓમિતિ બ્રહ્મા ભવતિ । નકારો વિષ્ણુર્ભવતિ । મકારો રુદ્રો ભવતિ । નકાર ઈશ્વરો ભવતિ । રકારોઽણ્ડં વિરાડ્ ભવતિ । યકારઃ પુરુષો ભવતિ । ણકારો ભગવાન્ભવતિ ।

યકારઃ પરમાત્મા ભવતિ । એતદ્વૈ નારાયણસ્યાષ્ટાક્ષરં વેદ
પરમપુરુષો ભવતિ ।
અયમૃગ્વેદઃ પ્રથમઃ પાદઃ ॥ ૧॥

(નારાયણસૂક્ષ્માષ્ટાક્ષરતારકમ્)

ૐઇત્યેતદક્ષરં પરં બ્રહ્મ । તદેવોપાસિતવ્યમ્ । એતદેવ
સૂક્ષ્માષ્ટાક્ષરં ભવતિ । તદેતદષ્ટાત્મકોઽષ્ધા
ભવતિ । અકારઃ પ્રથમાક્ષરો ભવતિ । ઉકારો દ્વિતીયાક્ષરો ભવતિ ।
મકારસ્તૃતીયાક્ષરો ભવતિ । બિન્દુસ્તુરીયાક્ષરો ભવતિ । નાદઃ
પઞ્ચમાક્ષરો ભવતિ । કલા ષષ્ઠાક્ષરો ભવતિ । કલાતીતા
સપ્તમાક્ષરો ભવતિ । તત્પરશ્ચાષ્ટમાક્ષરો ભવતિ ।
તારકત્ત્વાત્તારકો ભવતિ । તદેવ તારકં બ્રહ્મ ત્વં વિદ્ધિ ।
તદેવોપાસિતવ્યમ્ ॥ ૧॥

(પ્રણવાવયવદેવતાઃ)

અત્રૈતે શ્લોકા ભવન્તિ ॥

અકારાદભવદ્બ્રહ્મા જામ્બવાનિતિસંજ્ઞકઃ ।
ઉકારાક્ષરસંભૂત ઉપેન્દ્રો હરિનાયકઃ ॥ ૧॥

મકારાક્ષરસંભૂતઃ શિવસ્તુ હનુમાન્સ્મૃતઃ ।
બિન્દુરીશ્વરસંજ્ઞસ્તુ શત્રુઘ્નશ્ચક્રરાટ્ સ્વયમ્ ॥ ૨॥

નાદો મહાપ્રભુર્જ્ઞેયો ભરતઃ શઙ્ખનામકઃ ।
કલાયાઃ પુરુષઃ સાક્ષાલ્લક્ષ્મણો ધરણીધરઃ ॥ ૩॥

કલાતીતા ભગવતી સ્વયં સીતેતિ સંજ્ઞિતા ।
તત્પરઃ પરમાત્મા ચ શ્રીરામઃ પુરુષોત્તમઃ ॥ ૪॥

(શ્રીરામસ્ય સર્વાત્મકત્વમ્)

ઓમિત્યેતદક્ષરમિદં સર્વમ્ । તસ્યોપવ્યાખ્યાનં ભૂતં
ભવ્યં ભવિષ્યદ્યચ્ચાન્યત્તત્ત્વમન્ત્રવર્ણદેવતાછન્દો
ઋક્કલાશક્તિસૃષ્ટ્યાત્મકમિતિ । ય એવં વેદ ।
યજુર્વેદો દ્વિતીયઃ પાદઃ ॥ ૨॥

(જામ્બવદાદ્યષ્ટતનુમન્ત્રાઃ)

અથ હૈનં ભારદ્વાજો યાજ્ઞવલ્ક્યમુવાચાથ કૈર્મન્ત્રૈઃ
પરમાત્મા પ્રીતો ભવતિ સ્વાત્માનં દર્શયતિ તન્નો બ્રૂહિ
ભગવ ઇતિ ।

સ હોવાચ યાજ્ઞવલ્ક્યઃ ।

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાનકારવાચ્યો
જામ્બવાન્ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાનુકારવાચ્ય
ઉપેન્દ્રસ્વરૂપો હરિનાયકો ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૨॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાન્મકારવાચ્યઃ
શિવસ્વરૂપો હનૂમાન્ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૩॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાન્બિન્દુસ્વરૂપઃ
શત્રુઘ્નો ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૪॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાન્નાદસ્વરૂપો
ભરતો ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૫॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાન્કલાસ્વરૂપો
લક્ષ્મણો ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૬॥

ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાન્કલાતીતા
ભગવતી સીતા ચિત્સ્વરૂપા ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૭॥

યથા પ્રથમમન્ત્રોક્તાવાદ્યન્તૌ તથા સર્વમન્ત્રેષુ દ્રષ્ટવ્યમ્ ।
ઉકારવાચ્ય ઉપેન્દ્રસ્વરૂપો હરિનાયકઃ ૨ મકારવાચ્યઃ
શિવસ્વરૂપો હનુમાન્ ૩ બિન્દુસ્વરૂપઃ શત્રુઘ્નઃ ૪ નાદસ્વરૂપો
ભરતઃ ૫ કલાસ્વરૂપો લક્ષ્મણઃ ૬ કલાતીતા ભગવતી સીતા
ચિત્સ્વરૂપા ૭ ૐ યો હ વૈ શ્રીપરમાત્મા નારાયણઃ સ ભગવાંસ્તત્પરઃ
પરમપુરુષઃ પુરાણપુરુષોત્તમો નિત્યશુદ્ધબુદ્ધમુક્તસત્ય-
પરમાનન્તાદ્વયપરિપૂર્ણઃ પરમાત્મા બ્રહ્મૈવાહં રામોઽસ્મિ
ભૂર્ભુવઃ સુવસ્તસ્મૈ નમોનમઃ ॥ ૮॥

(વિદ્યાપઠનમન્ત્રાર્થજ્ઞાનયોઃ ફલમ્)

એતદષ્ટવિધમન્ત્રં યોઽધીતે સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો

ભવતિ । સ આદિત્યપૂતો ભવતિ । સ સ્થાણુપૂતો ભવતિ । સ સર્વૈર્દેવૈર્જ્ઞાતો
ભવતિ । તેનેતિહાસપુરાણાનં રુદ્રાણાં શતસહસ્રાણિ જપ્તાનિ ફલાનિ
ભવન્તિ । શ્રીમન્નારાયણાષ્ટાક્ષરાનુસ્મરણેન ગાયત્ર્યાઃ
શતસહસ્રં જપ્તં ભવતિ । પ્રણવાનામયુતં જપ્તં ભવતિ ।
દશપૂર્વાન્દશોત્તરાન્પુનાતિ । નારાયણપદમવાપ્નોતિ ય એવં વેદ ।
તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ।
તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે । વિષ્ણોર્યત્પરમં પદમ્ ॥

ઇત્યુપનિષત્ ॥

સામવેદસ્તૃતીયઃ પાદઃ ॥ ૩ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ તારસારોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Tarasara Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*